श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री पराशर संहितायाम्

# ॥ श्री आञ्जनेयमङ्गळाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री आञ्जनेयमङ्गळाष्टकम् ॥

कपिश्रेष्ठाय शूराय सुग्रीवप्रियमन्त्रिणे।
जानकीशोकनाशाय आञ्जनेयाय मङ्गलम् ॥ 1 ॥

मनोवेगाय उग्राय कालनेमिविदारिणे।
लक्ष्मणप्राणदात्रे च आञ्जनेयाय मङ्गलम् ॥ 2 ॥

महाबलाय शान्ताय दुर्दण्डीबन्धमोचन।
मैरावणविनाशाय आञ्जनेयाय मङ्गलम् ॥ 3 ॥

पर्वतायुधहस्ताय रक्षःकुलविनाशिने।
श्रीरामपादभक्ताय आञ्जनेयाय मङ्गलम् ॥ 4 ॥

विरक्ताय सुशीलाय रुद्रमूर्तिस्वरूपिणे।
ऋषिभिस्सेवितायास्तु आञ्जनेयाय मङ्गलम् ॥ 5 ॥

दीर्घवालाय कालाय लङ्कापुरविदारिणे।
लङ्किणीदर्पनाशाय आञ्जनेयाय मङ्गलम् ॥ 6 ॥

नमस्ते ब्रह्मचर्याय नमस्ते वायुनन्दन।
नमस्ते गानलोलाय आञ्जनेयाय मङ्गलम् ॥ 7 ॥

प्रभावाय सुरेशाय शुभदाय शुभात्मने।
वायुपुत्राय धीराय आञ्जनेयाय मङ्गलम् ॥ 8 ॥

आञ्जनेयाष्टकमिदं
यः पठेत्सततं नरः।

सिध्यन्ति सर्वकार्याणि
सर्वशत्रुविनाशनम् ॥ 9 ॥

॥ श्री आञ्जनेय मङ्गळाष्टकं समाप्तम् ॥